**2.4.8 - शैक्षणिक रूप से पुनर्भरण और शिक्षकों को फिर से जीवंत करने के लिए अपनाई गई प्रणालियाँ (उदाहरण के लिए पारंपरिक गुरुओं के साथ सीखना अनुसंधान अनुदान प्रदान करनाए अध्ययन अवकाशए राष्ट्रीय/अंतर्राष्ट्रीय सम्मेलनों/सेमिनारों में नामांकनए सेवाकालीन प्रशिक्षणए राष्ट्रीय/अंतर्राष्ट्रीय सम्मेलनों का आयोजनए वाक्यार्थ-सभाए शास्त्रार्थ-सभाए शास्त्र-परीक्षाए शास्त्र-स्पर्धा/संस्कृत-कवि-समन्वय (संस्कृत कवि सम्मेलन) आदि)**

***Systems adopted to recharge academically and rejuvenate teachers (e.g. learning with traditional Gurus, providing research grants, study leave, nomination to national/international conferences/ seminars, in-service training, organizing national/international conferences, vakyartha-Sabhas, Shastrartha-Sabha, Shastra-Pareeksha, Shastra-spardha/Samskrita-Kavi-Samavaya (Sanskrit Poets' Meet) etc.)***

---

अध्यापकानां शैक्षिकरूपेण पुनर्नवीकरणाय सम्पूर्णानन्दसंस्कृतविश्वविद्यालयेन अनेके कार्यक्रमाः आयोज्यन्ते। विश्वविद्यालयानुदान– आयोगेन तथा भारतसर्वकारेण निर्धारिताः अनुसन्धानानुदानप्रदानम्, अध्ययनावकाशप्रदानम्, राष्ट्रिय/अन्ताराष्ट्रियसम्मेलने नामनिर्देशनम्/सेवारतप्रशिक्षणम्, राष्ट्रिय/अन्ताराष्ट्रियसम्मेलनस्य आयोजनम्, इति नैकाः व्यवस्थाः कल्पयति। परिसरेषु अध्यापनरतानाम् अध्यापकानां वाक्यार्थसभाः, शास्त्रार्थसभाः, शास्त्रपरीक्षाः, शास्त्रस्पर्धाः, संस्कृतकविसमवायः इत्यादयः कार्यक्रमाश्च विश्वविद्यालयद्वारा आयोजिता भवन्ति।

प्रतिवर्षं संस्कृतसप्ताहः विश्वविद्यालये समाचर्यते। श्रावणपूर्णिमायां संस्कृतदिवसम् उपलक्ष्य आचार्यमाणे अस्मिन् कार्यक्रमे शैक्षिकाः संगोष्ठीाः आयोज्यन्ते।

प्रतिवर्षं जून मासस्य २१ तमे दिनांके 'अन्ताराष्ट्रिययोगदिवसः' आयोज्यते। अस्मिन् योगदर्शनस्य महत्त्वम् उपलक्ष्य विशिष्टं व्याख्यानम् आयोज्यते। योगासनानां प्रशिक्षणं दीयते। अध्यापकाः तत्र भागं गृह्णन्ति। तेन प्रतिदिनम् आसनानि कर्तुं प्रभवन्ति।

प्रतिवर्षं वाक्यप्रतियोगिता, शलाका, स्फूर्तिस्पर्धा, कण्ठपाठस्पर्धा च आयोज्यते। विविधेषु शास्त्रीयेषु विषयेषु स्पर्धाः संचाल्यन्ते। ताः स्पर्धाः स्थानीयस्तरे, राज्यस्तरे, राष्ट्रस्तरे च भवन्ति। छात्राः इतरच्छात्रैः सह स्पर्धित्वा स्थानीयस्तरे राज्यस्तरे च चिताः सन्तः राष्ट्रस्तरे प्रवेशं लभन्ते। विविधस्तरेषु भागं गृह्णतां छात्राणां कृते परिसरेषु अध्यापकाः मार्गदर्शनं यच्छन्ति। स्पर्धार्थं निर्धारितान् विषयान् छात्रान् पाठयन्ति। तदर्थं ते विशिष्टां कौशलञ्च सम्पादयन्ति। अत्र छात्राणां यशसि अध्यापकानां शास्त्रीयम् अध्यापनकौशलं बिम्बितं भवति।

विश्वविद्यालये प्रतिवर्षं राष्ट्रस्तरीयाः संगोष्ठीः, सम्मेलनानि च आयोज्यन्ते। तदेतद् आयोजनम् अध्यापकानां शैक्षणिककौशलनां पुनर्नवीकरणे एका वेदिका भवति।

विश्वविद्यालये अध्यापननिरतानाम् अध्यापकानां कृते विश्वविद्यालयानुदान-आयोगस्य नियमानुसारम् अपेक्षितेषु सेवानिरतप्रशिक्षणेषु भागं ग्रहीतुं अवसरः कल्प्यते। ते अध्यापकाः यूजीसि-मानवसंसाधनविकासकेन्द्रेषु आयोज्यमाने पुनश्चर्यापाठ्यक्रमे (RC) अभिविन्यासपाठ्यक्रमे (Orientation Programme) च भागग्रहणाय प्रेष्यन्ते। अध्यापकाः एतत्पाठ्यक्रमे भागं गृहीत्वा नैकानि अध्यापनकौशलानि प्राप्नुवन्ति। परिसरेषु कार्यनिरताः अध्यापकाः पुनश्चर्यापाठ्यक्रमे, अभिविन्यासपाठ्यक्रमे अन्येषु च विभिन्नपाठ्यक्रमेषु भागम् अगृह्णन्। तेषां नामानि-

अभिविन्यासपाठ्यक्रमे (Orientation Programme)

| क्रम संख्या | नाम | संस्था | सन् |
|---|---|---|---|
| 1. | डॉ. विजेन्द्र आर्य | रामानुजम कालेज, दिल्ली विश्वविद्यालय | 19 जून से 18 जुलाई 2021 |
| 2. | डॉ. कुंज बिहारी | रामानुजम कालेज, दिल्ली विश्वविद्यालय | 20 अक्टूबर से 18 नवम्बर 2022 |
| 3. | डॉ. मधुसूदन मिश्र | ,, | 20 अक्टूबर से 18 नवम्बर 2022 |
| 4. | श्री नितिन आर्य | ,, | 20 अक्टूबर से 18 नवम्बर 2022 |

पुनश्चर्यापाठ्यक्रमे (RC)

| क्रम संख्या | नाम | संस्था | सन् |
|---|---|---|---|
| 1. | डॉ. मधुसूदन मिश्र | एच.आर.डी.सी., काशी हिन्दू विश्वविद्यालय, वाराणसी | 27 अगस्त– 09 सितम्बर 2021 |
| 2. | डॉ. विजेन्द्र आर्य | रामानुजम कालेज, दिल्ली विश्वविद्यालय | 20 जुलाई से 03 अगस्त 2021 |
| 3. | डॉ. सत्येन्द्र यादव | एच.आर.डी.सी., डॉ. हरि सिंह गौर | 24 जनवरी से 28 फरवरी 2022 |
| 4. | डॉ. दुर्गेश पाठक | एच.आर.डी.सी., डॉ. हरि सिंह गौर | 01 सितम्बर से 08 सितम्बर 2022 |
| 5. | डॉ. विजय शर्मा | रामानुजम कालेज, दिल्ली विश्वविद्यालय | 23 फरवरी से 09 मार्च 2023 |
| 6. | श्री नितिन आर्य | रामानुजम कालेज, दिल्ली विश्वविद्यालय | 23 फरवरी से 09 मार्च 2023 |
| 7. | डॉ. कुंज बिहारी | रामानुजम कालेज, दिल्ली विश्वविद्यालय | 20 अक्टूबर से 18 नवम्बर 2022 |
| 8. | डॉ. मधुसूदन मिश्र | ’’ | 20 अक्टूबर से 18 नवम्बर 2022 |
| 9. | श्री नितिन आर्य | ’’ | 20 अक्टूबर से 18 नवम्बर 2022 |

विश्वविद्यालये विविधेषु शास्त्रीयेषु विषयेषु विशिष्टव्याख्यानानि आयोज्यन्ते। तत्र सम्पद्यमानैः शास्त्रेषु विशिष्टानां प्रसिद्धविपश्चिदां व्याख्यानैः अध्यापकाः अधिकं प्रयोजनं लभन्ते।

वाक्यार्थसभायाः आयोजने प्रोत्साहनं दीयते। सभासु अध्यापकाः आदर्शवाक्यार्थं प्रस्तुवन्ति। सिद्धतापूर्वकं पूर्वपक्षसिद्धान्तक्रमेण विषयोपस्थापनकौशलं प्राप्तुम् ते अवसरं प्राप्नुवन्ति।

अन्यस्थानेषु आयोज्यमानासु शास्त्रार्थसभासु विश्वविद्यालयस्य अध्यापकाः भागं गृह्णन्ति। प्रतिभायाः प्रकाशनाय कविसम्मेलनम् एका वेदिका भवति। विश्वविद्यालयस्य प्रतिभावन्तः अध्यापकाः काव्यानि विरच्य सम्मेलनेषु प्रस्तुवन्ति। विश्वविद्यालये विविधावसरेषु संस्कृतकविसवायः आयोज्यते। एवं बहवः शैक्षिकाः कार्यक्रमाः अध्यापकानां पुनर्नवीकरणाय अभिगृहीताः वर्तन्ते।